द्रव्यसंयोगजक्रियेति तत्सिद्धेः न च क्रियायामूर्त्तमात्रसम-
वेतासमवायिकारणत्वनियमः कार्य्यमात्राभिप्रायेण ज्ञानादौ
व्यभिचारात् विशेष्याप्रयोजकत्वात् असमवायिकारण-
संयोगाश्रयस्य तत्कार्य्यजनकत्वनियमाच्च । अन्ये तु
अनुकूलकृतिसमवायित्वं कर्तृत्वं न तु जनकत्वे सति,
गौरवात् कर्त्तरि कारकव्यवहारस्याभियुक्तानां "सविशेषण"
इति न्यायेन कृतिपर्य्यवसन्न एव । एवं ज्ञानेच्छाकृतिजन्यत्व-
मेव साध्यं तदाश्रयत्वमेवेश्वरस्य कर्तृत्वम् । अथ घटे कृति-
साध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः तच्च न
प्रत्यक्षं चिकीर्षाविषयेऽनागते इन्द्रियासामर्थ्यात् किन्त्वनु-
मितिरूपं तथा च साध्यविकलो दृष्टान्तः साध्याप्रसिद्धिर्वेति
चेन्न सिद्धवत्त्यसिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति
भवति न हि सूपौदनपचनानां संस्थानविशेषे कृतिसाध्ये-
ष्टसाधनारण्यक्रयणस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः
अतएव यागे शब्दात्तदुपजीविलिङ्गाद्वा कृतिसाध्येष्टसाध-
नत्वेऽवगतेऽपि हविरादीनां प्रत्यक्षेणानुपस्थितौ न
प्रवृत्तिः न चोपादानप्रत्यक्षं प्रवर्त्तकज्ञानोपक्षीणम्
अप्रत्यक्षपरमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः
प्रवृत्तिविषयस्यदङ्कुरादेः प्रत्यक्षत्वान्न शङ्कुतकारादिना
व्यभिचारः न चाभिमतग्राहकेन्द्रियसंयोगान्मनसि
प्रयत्नजन्यक्रियाप्रदर्शनाद्व्यभिचारः अदृष्टसहकृतत्वगि-
न्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रय-
त्नाच्चाडीक्रिया ततः स्पर्शवद्वेगवन्नाड्या नोदनान्मनसि
क्रिया न तु प्रयत्नात् । अतएव जलाद्यभ्यवहारमलोत्स-
र्गहेतुनाडीनामजाद्यभ्यासवासनावशाददृष्टसहकृतत्वगिन्द्रिये-
णोपलम्भात् तद्गोचरः प्रयत्नः । नन्वेवं घटादावनुमिते
जन्यत्वदर्शनादीश्वरेऽनुमितिरेव न सिद्ध्येत् यथा च प्रत्य-
क्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे तथानुमितेर्नित्यं
जन्यत्वेऽपि सा तत्र नित्यैव अनित्येनानादिद्व्यणुकाद्य-
जननादिति चेन्न सुखदुःखाभावादिसाधनानुमिते तर्हि
घटादौ हेतुत्वं गृहीतं न च तावता शरीराद्यदृष्टाभा-
वेन सुखमस्त्यतो न क्षित्यादौ तस्यानुमितिर्यथार्था सम्भवति
न च तादृशानुमितेरनुमित्यन्तरस्य वाऽनुमितित्वेन घटादौ
इच्छिविषयप्रत्यक्षत्वं हेतुत्वं गृहीतमतो नेश्वरेऽनुमितिः ।
नन्वद्वेषजन्यकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारः
तद्दृष्टान्तेन क्षित्यादौ द्वेषसाध्यत्वादीश्वरे द्वेषोऽपि स्यात्
द्वेषवतः संसारित्वेन भगवतोऽपि तथा स्यादिति चेन्न
न हि सर्पादिद्वेषादेव तन्नाशानुकूलव्यापारे कृतिरुत्सु-

सहेति प्रयोजनं विना दुःखैकफले प्रेक्षावतां कृतेरनु-
पपत्तेः किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं
वा फलमुद्दिश्य तत्साधनताज्ञानात्, तथा चेष्टसाधनता
ज्ञानात्तदिच्छातस्येवेति सैव कृतिकारणं क्लृप्तत्वात् द्वेषस्तु
परम्परया तदुपक्षीणः, कुतस्तर्हि द्वेषः, शत्रुं द्वेष्मीति
अबाधितप्रत्ययात् । न चादृश्यकर्तुरनुपलब्धिबाधः, अनुप-
लब्धिमात्रस्य बाधकत्वेऽतीन्द्रियोच्छेदात् योग्यानुपलब्धेश्चा-
सिद्धेः परात्मनोऽयोग्यत्वनियमात् शशशृङ्गप्रतिबन्द्यां
च नादृश्यमात्रनिरासः परमाण्वादिस्वीकारात् नाप्य-
योग्यकर्तृकनिरासः चेष्टया ज्ञानादिमतः परात्मनोऽनु-
मानात् परं प्रति तस्य योग्यत्वात् । नापि शृङ्गे पशुत्ववद्
प्रयोजकं, कर्तुः कार्य्यमात्रे कारणत्वावधारणात् प्रतिब-
न्दिमात्रस्यादूषणत्वात् । शशे पशुत्वेनायोग्यशृङ्गसिद्धिः
कुतो नेति चेत् अर्थान्तरत्वात् विपक्षे बाधकाभावात् व्याप्त्य-
सिद्धेः शृङ्गत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वे योग्यस्य विरो-
धेन शङ्कितुमशक्यत्वात् शशे शृङ्गस्यात्यन्ताभाव इति सर्वे-
षामबाधितप्रत्यक्षबाधितत्वाच्च । अथ कृतिकार्य्यत्वयोर्नान्वय
व्यतिरेकाभ्यां व्याप्तिग्रहः त्वन्मते व्यापककृतेः सत्त्वेन देशे
समये वा कृतिमात्रव्यतिरेकानिरूपणात् नित्यकृतेरन्वयो-
ऽपि गृहीतो न वह्निमात्रव्यतिरेकोऽस्ति गृह्यते च । न
चैवमाकाशात्मनोरप्यसिद्धिः समवायिमात्रस्य व्यतिरेकानि-
रूपणेन कार्य्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धे-
रिति वाच्यं समवायिकारणत्वग्रहे हि तस्य सर्गाभावोऽ-
प्रयोजको निमित्तमात्रसाधारणत्वात् किन्तु यत्सम-
वायि तत्र कार्य्यं यन्न समवायि तत्र नेत्यन्योन्याभाव-
मादाय कार्य्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात् ।
समवायित्वेन तयोरन्योन्याभावोऽस्ति गृह्यते च । यद्वा
भावकार्य्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति
यथा हि यद्वह्नेरन्वये धूमो गृहीतस्तद्व्यतिरेके धू-
मव्यतिरेकग्रहात् वह्निधूममात्रयोर्व्याप्तेर्ग्रहः न तु पर्व-
तीयवह्नेः अन्वयव्यतिरेकग्रहात् । न चान्यान्वयव्यतिरे-
काभ्यामन्यव्याप्तिग्रहेऽतिप्रसङ्गः यद्विशेषयोरन्वयव्यति-
रेकग्रहः तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात् स च
वह्निधूमव्याप्तिग्रहे उत्पद्यमानः सकलधूमगोचरो-
धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव न भवति । तथे-
हापि कृतिविशेषकार्य्यविशेषयोरन्वयव्यतिरेकग्रहो बाधकं
विना कृतिकार्य्यत्वमात्रयोर्व्याप्तिग्रह उपायः न तु पक्ष-
धर्मताबलेन अविशेषान्वयव्यतिरेकग्रहः अनुमानमात्रो-